[1]नुदन् ती-न्ती, नोदयन्-न्ती, नुनुत्सन्-न्ती ; —

नोत्स्यन्-न्ती-ती, नोदयिष्यन्-न्ती-ती, नुनुत्सिष्यन्-न्ती-ती ; —

नुदमानः, [A]प्रणुदमानः, नोदयमानः, नुनुत्समानः, नोनुद्यमानः ;

नोत्स्यमानः, नोदयिष्यमाणः, नुनुत्सिष्यमाणः, नोनुदिष्यमाणः ;

अपनुत्-अपनुद्-अपनुदौ-अपनुदः ; — —

[2]नुन्नः-नुत्तः-[B]प्रणुन्नम्-नुत्तम्-नुन्नम्-नुन्नवान्-नुत्तवान्, नोदितः, नुनुत्सितः, नोनुदितः-तवान् ;

[3]नुदः, [4]शोकापनुदः,[C] [5]शोकापनोदः, विनोदी, नोदः, [D]नुनुत्सुः, नोनुदः ;

नोत्तव्यम्, नोदयितव्यम्, नुनुत्सितव्यम्, नोनुदितव्यम् ;

नोदनीयम्, नोदनीयम्, नुनुत्सनीयम्, नोनुदनीयम् ;

नोद्यम्, नोद्यम्, नुनुत्स्यम्, नोनुद्यम् ;

ईषन्नोदः-दुर्नोदः-सुनोदः ; — —

नुद्यमानः, नोद्यमानः, नुनुत्स्यमानः, नोनुद्यमानः ;

नोदः-विनोदः, [6]काकुदः [तालु], नुनुत्सः, नोनुदः ;

---

1. 'तुदादिभ्यः—' (3-1-77) शः विकरणप्रत्ययः। शस्य ङिद्वद्भावादङ्गस्य गुणो न। स्त्रियाम्, 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् वा।
2. 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' (8-2-56) इत्यनेन निष्ठातकारस्य धातुदकारस्य च नत्वविकल्पः तेन रूपद्वयम्।
3. 'इगुपध—' (3-1-135) इति कर्तरि कप्रत्ययः।
4. 'तुन्दशोकयोः परिमृजापनुदोः' (3-2-5) इत्यत्र 'आलस्य सुखाहरणयोरिति वक्तव्यम्' (वा. 3-2-5) इति वचनात् शोकनिवृत्तिपूर्वकं सुखसम्पादके पुत्रादौ **शोकापनुद** इति कप्रत्ययो भवति। कर्मण्यणोऽपवादः।
5. केवलं शोकमात्रं यः अपनुदति, न तु सुखस्याहर्ता, तत्र 'कर्मण्यण्' (3-2-1) इत्यणेव।
6. काकुः=जिह्वा। सा अस्मिन् नुद्यते इति **काकुदम्**=तालु। बञर्थे कविधानम्। पृषोदरादित्वात्— (6-3-109) नुशब्दस्य लोपः।

A. 'तुदन् कुचरितान् शुभे **प्रणुदमान** इष्टं दिशन् प्रमृष्टपल्लान् क्षिपन् अरिमतिं कृषन् माधवः।' धा. का. 2.72.

B. 'दयितावलोकविकसन्नयनप्रसर**प्रणुन्न**मिव वारिरुहम्॥' **शि. व. 9. 71.**

C. 'पौरा निवर्तध्वमिति न्यगादीत् तातस्य **शोकापनुदा** भवेत।' भ. का. 3. 15.

D. 'यदवादिषमप्रियं तव प्रियमाधाय **नुनुत्सु**रस्मि तत्।' नैषधे—2.11.